# श्रीमद् भागवत रसिक कुटुंब

## श्रीतुलसीस्तुतिः(भगवत्कृता)

वृंदा वृन्दावनी विश्व-पावनी विश्वपूजिता ।
पुष्पसारा नंदिनी च, तुलसी कृष्णजीवनी ॥
एतन्नामाष्टकं(ञ्) चैव, स्तोत्रं(न्) नामार्थसंयुतम् ।
यः(फ्) पठेत् तां(ञ्) च सम्पूज्य, सोऽश्वमेधफलं(लँ) लभेत् ॥

श्रीभगवानुवाच

वृन्दारूपाश्च वृक्षाश्च, यदैकत्र भवन्ति च ।
विदुर्बुधास्तेन वृन्दां(म्), मत्प्रियां(न्) तां(म्) भजाम्यहम् ॥1॥

पुरा बभूव या देवी, त्वादौ वृन्दावने वने ।
तेन वृन्दावनी ख्याता, सौभाग्यां(न्) तां(म्) भजाम्यहम् ॥2॥

असं()ख्येषु च विश्वेषु, पूजिता या निरन्तरम् ।
तेन विश्वपूजिताख्यां(ञ्), जगत्पूज्यां(म्) भजाम्यहम् ॥3॥

असं(ङ्)ख्यानि च विश्वानि, पवित्राणि यया सदा ।
तां(वँ) विश्वपावनीं(न्) देवीं(वँ), विरहेण स्मराम्यहम् ॥4॥

देवा न तुष्टाः(फ्) पुष्पाणां(म्), समूहेन यया विना ।

**तां(म्) पुष्पसारां(म्) शुद्धां(ञ्) च, द्रष्टुमिच्छामि शोकतः॥5॥**

**विश्वे यत्प्राप्तिमात्रेण, भक्तानन्दो भवेद् ध्रुवम्।**
**नन्दिनी तेन विख्याता, सा प्रीता भवताद्धि मे ॥6॥**

**यस्या देव्यास्तुला नास्ति, विश्वेषु निखिलेषु च ।**
**तुलसी तेन विख्याता, तां(यँ) यामि शरणं(म्) प्रियाम् ॥7॥**

**कृष्णजीवनरूपा या, शश्वत्प्रियतमा सती ।**
**तेन कृष्णजीवनीति, मम रक्षतु जीवनम् ॥8॥**

**॥ इति श्रीब्रह्मवैवर्तमहापुराणे प्रकृतिखण्डे भगवत्कृता तुलसीस्तुतिः(स्) संपूर्णा॥**